# डी ए वी पब्लिक स्कूल्स

## बिहार क्षेत्र जी

## आवधिक-परीक्षा 2023-24

## कक्षा –दशमी

**समय: – होरात्रयम्** **विषय: - संस्कृतम्** **पूर्णाङ्का: - 80**

**निर्देशा: -**

- अस्मिन् प्रश्नपत्रे चत्वार: खण्डार: सन्ति।
- प्रतिखण्डम् उत्तराणि पृथक् दत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
- प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि।
- प्रश्नपत्रे उत्तराणि न लेखनीयानि।
- प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।
- खण्डसङ्ख्या अपि लेखनीया।

### खण्ड: (क) अपठित -अवबोधनम् (10)

**1. अधोलिखित गद्यांश पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।**

पुरा अस्माकं देशे बहवः प्रसिद्धाः राजानः अभवन्। तेषु दुष्यन्तः नाम एकः नृपः आसीत्। तस्य भार्या शकुन्तला आश्रमे पुत्रम् अजनयत्। तस्य नाम भरतः आसीत्। भरत: शैशवास्थायां अपि आश्रमे सिंहशावकै: सह क्रीडति स्म। एकदा स: एकस्य सिंहशावकस्य मुखम् उदपाटयत् अवदत् च- जुम्मस्व सिंह!दन्तान् ते गणयिष्यामि।'सिंहशावक: अपि जानाति स्म यत् भरतः अपि मया सदृशः शिशुः अस्ति मया सह च क्रीडति अतः सः भरताय नाक्रुध्यत् न च आक्रम्यत् । तत्र तापसीभ्यां निषिद्धः अपि भरतः कथयति स्म- नाहं सिंहात् बिभेमि । इत्थम् आसीत् सः निर्भयः वीरः भरतः। भरतस्य अभिधानेन एवं अस्माकं देशस्य आर्यावर्तस्य नाम 'भारतम्' अभवत्।

**I. एकपदेन उत्तरत। (केवल प्रश्नद्वयम्)** **1×2=2**

(i) निर्भय: वीरः च कः आसीत्?

(ii) भरत: कै: सह क्रीडति स्म?

(iii) भरतस्य मातुः नाम किम् आसीत् ?

**II .पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** **2x2=4**

(i) भरतः सिंहशावकं किम् अवदत् ?

(ii) सिंहशावकः भरताय किमर्थं नाक्रुध्यत् न च आक्राम्यत् ?

(iii) भरतः तापस्यौ किं कथयति स्म ?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।** **1×1=1**

IV. यथानिर्देशम् उत्तरत। (केवलं प्रश्नत्रयम्) 1×3=3

(i) इत्थम् आसीत् सः निर्भयः वीरः भरतः' अत्र किं क्रियापदम् ?

(क) इत्थं (ख) आसीत् (ग) निर्भयः (घ) वीरः

(ii) 'सदृशः' इति विशेषणपदस्य विशेष्यपदं किम्?

(क) नृपः (ख) वीरः (ग) निर्भयः (घ) शिशुः

(iii) 'नृपाः' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(क) सिंहशावकः (ख) दन्तान् (ग) राजानः (घ) प्रसिद्धाः

(iv) 'गणयिष्यामि' इति क्रियापदस्य कर्तृपदं किं भवेत् ?

(क) अहम् (ख) ते (ग) सः (घ) दन्तान्

## खण्डः (ख) रचनात्मक - कार्यम् (15)

2. रुग्णताकारणात् स्वप्रधानाचार्याय अवकाशार्थम् अधोलिखित प्रार्थनापत्रं मञ्जूषा प्रदत्तपदैः पूरयित्वा लिखत। $(1/_2 \times 10 = 5)$

सेवायाम्

(i) ...........प्रधानाचार्य महोदयाः

राजकीय उच्च माध्यमिक विद्यालयः, रामपुरम् ।

विषयः - दिनत्रयस्य (ii).............प्रार्थना-पत्रम्!

महोदयः,

(iii).............निवेदनमस्ति यदहं विगत (iv)........... ज्वरपीडितोऽस्मि ।अतः (v).............कारणादहं विद्यालये (vi).........न शक्नोमि। अतः (vii).............अस्ति यत् दि. 15-12-2023 तः 17-12-2023 पर्यन्त (viii).......... अवकाशं(ix)................मामनुग्रहीष्यन्ति श्रीमन्तः।

भवदाज्ञाकारी शिष्यः

(x).......... कक्षा दशमी

[मञ्जूषा - स्वीकृत्य, योगेशः, सविनयम्, अस्वस्थता, अवकाशाय, श्रीमन्तः, दिवसात्, आगन्तुं, प्रार्थना, दिनत्रयस्य।]

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत। 1x5=5

मंजूषा- छात्राः, वनस्य, महिला, रोपयन्ति, पर्वताः, पादपान्, आकाशे, सिञ्चति, मेघाः, दृश्यन्ते ।



**4. अधोलिखितानि वाक्यानि संस्कृतभाषायां अनूद्य लिखत- (केवलं वाक्यपञ्चकम्)** 1×5=5

(i) हमलोग कर्यालय जाएंगे ।

(ii) तुमदोनों पुस्तक पढ़ते हो।

(iii) तुमलोग घर जाओ।

(iv) मैं कल गांव जाऊंगा।

(v) आज विद्यालय में उत्सव होगा।

(vi) सीता पुस्तक नहीं पढ़ती है।

(vii) नगर के बाहर बगीचा है।

5. **अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत (केवलं प्रश्नचतुष्टयम्)** **1×4=4**

(i) **जगत् +ईशः** सर्वान् रक्षति।

(ii) **बालोऽपि** विद्यालयं गच्छति।

(iii) त्वया महत्कौतुकम् आवेदितं **यत् +मानुषादपि** विभेषि ।

(iv) महानगरमध्ये **चलदनिशं** कालायसचक्रम्।

(v) सः **निर्बलः** अस्ति।

6. **अधोलिखितवाक्येषु रेखांकितपदानां समास विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नः चतुष्टयम्)** **1×4=4**

(i) तत्र राजसिंहः नाम **राजपुत्रः** वसति स्म।

(अ) राजस्यपुत्रः (ब) राज्ञः पुत्रः (स) राजा पुत्रः

(ii) सर्वे छात्राः **विद्यालयं** गच्छन्ति।

(अ) विद्यां आलयः (ब) विद्यायाः आलयः (स) विद्य आलयः

**(iii) पीतम् अम्बरं यस्य सः ।**

(अ) पिता अम्बरः (ब) पीताम्बरः (ग) पीत आलयः

(iv) दिल्ली महानगरं **यमुनातटे** स्थितः अस्ति।

(अ) यमुनेतटे (ब) यमुनायाः तटे (स) यमुनात् तटे

**(v)** अहं भवतः **शरणम् आगता ।**

(अ) शरणागता (ब) सरणेगता (स) शरणगता

7. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत (केवलं प्रश्नचतुष्टयम)** **1×4=4**

(i) सः बालकः **बुद्धिः+मतुप्** अस्ति।

(अ) बुद्धिम् (ब) बुद्धिमतुप् (स) बुद्धिमान्

(ii) सा **बालक+टाप्** तीव्रं धावति।

(iii) (अ) बालकः (ब) बालिका (स) बालकम्

(iv) तस्य दानशीलता **लौकिकी**.......................न भवेत् ।

(अ) लोक्+ ठक् (ब) लोकं+ठक् (स) लोकाः+ठक्

(v) अस्या **अनुजा** सीता अस्ति।

(अ) अनुज + टाप् (ब) अनुगत+ टाप् (स) अनुजम+टाप्

(vi) **मास+ ठक्** .........पत्रं एतत् वर्तते।

(अ) मासिकाम् (ब) मासिकः (स) मासिकान्

8. **वाच्यस्य नियामानुगुणम् उचितम् विकल्पं चिनुत- ((केवलं प्रश्नत्रयम)** **1×3=3**

**(i) ..........महाभारतं पठ्यते।**

(अ) अहम् (ब) मया (स) आवाभ्याम्

**(ii) तया रामायणं ................?**

(अ) पठति (ब) पठ्यते (स) पठयामि

**(iii) शिक्षकः किं त्वया क्रीडनाय ..........?**

(अ) गच्छति (ब) गच्छथ (स) गम्यते

**(iv) ........ फलं खाद्यते।**

(अ) तत् (ब) तेन (स) तस्मै

09. **प्रदत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत-(केवलं प्रश्नचतुष्टयम्)** 1x4 = 4

(i) अहं प्रातः काले……..6:00 वादने जागरणं करोमि।

(ii) सः……..6:15 व्यायामं करोमि।

(iii) अहं ………7:45 वादने विद्यालयं गच्छामि।

(iv) ……..2:30 वादने विद्यालयस्य अवकाशः भवति।

(v) … ….3:00 वादने विद्यालयात् गृहम् आगच्छामि।

**मञ्जूषा –त्रि, सार्धद्वि, सपाद् षट्,षट्, पादोन अष्ट,**

10. **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत- (केवलं प्रश्नत्रयम्)** 1×3=3

(i) काकः ……….. वदति।

(ii) अहं ………जयपुरम् गमिष्यामि।

(iii) ………सोमवासरः अस्ति।

(iv) ………अहं गृहं अगच्छम्।

**मञ्जूषा -ह्यः, उच्चैः, अद्य, श्वः**

11. **अधोलिखितवाक्येषु रेखांकित अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत- (केवलं प्रश्नत्रयम्)** 1×3=3

(i) द्वौ छात्रौ **<u>गच्छति।</u>**

(अ) गच्छतः (ब) गच्छन्ति (स) गच्छति

(ii) **<u>स</u>**: बालिका भोजनं करोति।

(अ) ताः (ब) सा (स) तम्

(iii) सीता **<u>रामस्य</u>** सह वनं अगच्छत्।

(अ) रामम् (ब) रामेण (स) रामौ

(iv) अहं तस्याः सहायतां **<u>करिष्यति</u>**।

(अ) करिष्यसि (ब) करिष्यामि (स) करिष्यावः

**खण्डः (घ) पठित अवबोधनम् – 30 अंशाः**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** 5

अस्ति देउलाख्यो ग्रामः । तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एक व्याघ्रं ददर्श । सा

व्याघ्रमागच्छन्तं दृष्ट्वा धाष्टयत् पुत्रौ चपेटया प्रहत्य जगाद - "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः ? अयमेकस्तावद्विभज्य भुज्यताम् । पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते। "

**I. एकपदेन उत्तरत।** **(1/2 x 2 = 1)**

(क) किं नाम ग्रामः अस्ति

(ख) ग्रामे कः राजपुत्रः वसति स्म ?

**II. पूर्णवाक्येन उत्तरत।** **(1 x 2 = 2 )**

(क) बुद्धिमती पुत्रद्वयोपेता कुत्र गच्छति?

(ख) गहनकानने बुद्धिमती कं ददर्श ?

**III. निर्देशानुसारम् उत्तरत।** **(1x2=2)**

(क) 'सा एकं व्याघ्रं ददर्श' अत्र क्रियापदं किम् अस्ति ?

(ख)'वने' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम् ?

**13. अधोलिखितान् श्लोकान् पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत।** **5**

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बंधुः कृत्वा यं नावसीदति ।।

**I. एकपदेन उत्तरत ।** **(1/2 x 2 = 1)**

(क) महान रिपु कः अस्ति ?

(ख) किं कृत्वा मनुष्यः न अवसीदति ?

**II. पूर्णवाक्येन उत्तरत।** **(1×2=2)**

(क) आलस्य कुत्र स्थितः अस्ति ?

(ख) श्रेष्ठः बन्धुः कः ?

**III. भाषिक कार्यस्य लघु उत्तरात्मकानां प्रश्नानाम् उत्तरत।** **(1×2=2)**

(कं) उद्यमं पदस्य विपर्यय पदं पद्यांशे किम् अस्ति ?

(ख) 'महान् रिपु ' अत्र विशेष्य पदं किम् ?

**14. अधोलिखितं नाट्यांशम् पठित्वा तदाधारितान् प्रश्नान् उत्तरन्तु ।** **5**

रामः - अहमत्रभवतोः जनकं नामतो वेदितुमिच्छामि।

लवः - न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति ।

रामः - अहो माहात्म्यम्।

कुशः - जानाम्यहं तस्य नामधेयम् ।

रामः - कथ्यताम्।

कुशः - निरनुक्रोशो नाम ।

रामः - वयस्य, अपूर्वं खलु नामधेयम्।

I. एकपदेन उत्तरत। (1/2×2=1)

(क) 'वयस्य, अपूर्वं खलु नामधेयम्' इति कः वदति ?

(ख) कुत्र कोऽपि तस्य नाम न व्यवहरति ?

II. पूर्णवाक्येन उत्तरत। (1×2=2)

(कं) रामः किं वेदितुमिच्छति ?

(ख) कुशः स्वस्य पितुः किन्नाम कथयति ?

III. प्रश्नानाम् उत्तरत। (1×2=2)

(क) 'तस्य नाम व्यवहरति' अत्र क्रियापदं किम् अस्ति ?

(ख) 'पितरं पदस्य पर्याय पदं गद्यांशे किम् अस्ति ?

15. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुर्वन्तु-( केवलं प्रश्नः चतुष्टयम्) 1×4=4

(i) <u>कृषकः</u> क्षेत्रकर्षणं कुर्वन्नासीत्।

(ii) <u>सुराधिपः</u> ताम् अपृच्छत्।

(iii) रामः <u>लवकुशौ</u> आसनार्धम् उपवेशयति ।

(iv) त्वं <u>मानुषात्</u> बिभेषि।

(v) <u>महानगरेषु</u> वाहनानां अनन्ताः पंक्तय: धावन्ति।

16. अधोलिखित श्लोकस्य अन्वयं मञ्जुषायाः सहायतया पूरयत। (1×4=4)

वायुमंडलं भृशं दूषितं न हि निर्मलं जलम्।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ।
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम् ।।

अन्वयः –

(i)................ भृशं दूषितं निर्मलं

(ii) .............हि न कुत्सित वस्तु मिश्रितं

(iii) .......... धरातलं बहिरन्तर्जति तु बहु

(iv) .............करणीयम् ।

[मञ्जूषा - शुद्धीकरणम्, समलं, जलम्, वायुमंडलम्]

अथवा

अधोलिखितं श्लोकस्य भावार्थम् मञ्जूषायाः उचितपदैः पूरयत । (1×4=4)

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम् ।
वाष्पयानमाला संधावति वितरन्ती ध्वानम्॥
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्/शुचि ।।

**भावार्थ**: - महानगरेषु शतशः

(i) ............कज्जलसदृशं मलिनं वाष्पं व्यजन्ति ।

(ii)............ पंक्तिः कोलाहलं कुर्वन्ति तीव्रगत्या ।

(iii)..........वस्तुतः अत्र असंख्या।

(iv) ..............पंक्तयः सन्ति, अनेन सञ्चलनं कठिनं जातम्।।

**[मञ्जूषा – यानानां, धावति, वाष्पयानानां, शकटीयानानि ।]**

**17. अधोलिखितं कथांश समुचितक्रमेण लिखत ।** **(1/2 x 8 = 4)**

(i) इयम् व्याघ्रमारीति मत्वा व्याघ्रो भयाकुलचित्तो पलायितः ।

(ii) पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।

(iii) अयमेकस्तावद्विभज्य भुज्यताम्।

(iv) एकैकशो व्याघ्रभक्षणाय कलहं मा कुरुथः।

(v) राजसिंहस्य भार्या बुद्धिमति आसीत्।

(vi) सा पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता ।

vii) सा धाष्ट्र्यात् पुत्रो चपेटया प्रहृत्य जगाद ।

(viii) मार्गे गहनकानने सा एकं व्याघ्रं ददर्श ।

**18. मेलनम् कुरुत -** **(1×3=3)**

| | | |
|---|---|---|
| (क) ददर्श | - | (i) वने |
| (ख) कानने | - | (ii) शृगालः |
| (ग) जम्बुकः | - | (iii) द्रष्टुम् |